Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ श्रीराममन्त्रप्रसङ्गात् हनूमन्मन्त्रोपि लिख्यते --

ब्रह्मा ऋषिः । गायत्री छन्दः । हनुमान्देवता । ह्रां बीजम् । ह्रीं शक्तिः । श्रीहनुमत्प्रीत्यर्थे विनियोगः । ह्रां हृत् । ह्रीं शिरः । इत्याद्यङ्गानि ।

ध्यानम् —

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

ओं नमो भगवते हनुमते मम मदनक्षोभं संहर संहर आत्मतत्वं प्रकाशय प्रकाशय हुंफट् स्वाहा ॥ इति मन्त्रः । विद्याप्रदः ॥

हनूमन्मन्त्रान्तरमाह —

कर्शि कुक्ष वरवर अञ्जनावरपुत्र *आवेशि आवेशि ओं ह्रीं हनुमन् फट् । पूर्वोक्तवदङ्गऋष्यादिध्यानम् । अनेन पिशाचादिनिवृत्तिः ॥

अथ प्रसङ्गात् मन्त्रसारोक्तहनूमन्मन्त्रोप्यत्र योग्यतावशात् लिख्यते —

वसिष्ठ ऋषिः । अनुष्टुप्छन्दः । हनूमान् देवता । ओं नमो हनुमते हृत् । मम मदनक्षोभं शिरः । संहर संहर शिखा । आत्मतत्वं कवचम् । प्रकाशय प्रकाशय नेत्रम् । हुंफट् स्वाहा अस्त्रम् ॥

वामे जानुनि वामबाहुमपरं ज्ञानाख्यमुद्रायुतं
हृद्देशे कलयन् धृतो मुनिगणैरध्यात्मदत्तेक्षणः ।
आसीनः कदलीवने मणिमये बालार्ककोटिप्रभो
ध्यायन्ब्रह्म परं करोतु मनसः *सिद्धिं हनूमान्मम ॥

---

*आवेशय आवेशय इति ङ मातृकापाठः

ओं नमो हनूमते मम मदनक्षोभं संहर संहर आत्मतत्वं प्रकाशय प्रकाशय हुंफट् स्वाहा । मदनक्षोभशान्तिविद्याप्रधानोयं मन्त्रः ॥

शीर्षालिकश्रवणनेत्रकपोलनासादोःपादसन्धिकटिनाभिसपार्श्वहृत्सु ।
कण्ठांसयुग्ममुखमूर्धसु च क्रमेण मन्त्राक्षरान्न्यसतु शुद्धमतिः स्वदेहे ॥

लक्षं जपेत् । कदळीपक्वैर्वा पनसपक्वैर्वा स्वादुप्लुतैर्दशांशं पुरश्चरणाहोमः ॥

अथ पूजा — नवशक्तिरहिते सामान्यपीठे आवाह्य अङ्गैः प्रथमावृतिः । जाम्बवते० विनताय० नीलाय० पनसाय० गन्धमादनाय० सुषेणाय० मैन्दाय० द्विविदाय० ८ इति द्वितीयावृतिः । लोकेशैस्तृतीया । तदायुधैश्चतुर्थी । अस्य यन्त्रम् — कर्णिकायां लिखेत्तारं साध्यगर्भं च तद्बहिः ।
अष्टपत्रे केसरोद्यत्स्वरद्वन्द्वे मनोः क्रमात् ॥

आद्ये सप्त द्वितीये च चतुरोर्णास्तृतीयके ।
सप्त तुर्ये पञ्चमे च त्रीणि त्रीण्यक्षराण्यपि ।
षट्सप्ताष्टमपत्रेषु चतुरश्चतुरोऽक्षरान् ॥

वृत्तोल्लसत्कादिवर्णं भूपुराश्रस्थतारकम् ।
हनूमतो यन्त्रमेतत् वाञ्छितार्थप्रदं परम् ॥

इदमेव विलिख्य साधु यन्त्रं नवनीते प्रतिजप्य मन्त्रमेनम् ।
परिभक्षयतामनङ्गपीडा प्रशमं गच्छति शुद्धिमेति चेतः ॥

प्रयोगान्तरम् —

आदाय दोष्णा सलिलं प्रसन्नं प्रजप्य मन्त्रं प्रपिबेत् त्रिवारम् ।
रागादिदोषप्रशमाय बुद्धेः ज्ञानोदयाय प्रशमाय वृत्तेः ॥

---

* शुद्धि इति ङ पाठः ।